मिहिरः, पुं, (मेहयति सेचयति मेघजलेन भूमिमिति । मिह + "इषिमदिमुदिखिदिच्छिदिभिदिमन्दिचन्दितिमिमिहीति ।" उणा० १ । ५२ । इति किरच् । ) सूर्य्यः । ( यथा, मार्कण्डेये ।१०७।७।

"भव तिमिरासवपानमदात्
भवति विलोहितविग्रहात् ।
मिहिर ! विभासि यतः सुतरां
त्रिभुवनभावनभानिकरैः ॥")

अर्कवृक्षः । इत्यमरः । १ । ३ । २८ ॥ वृद्धः । इति मेदिनीशब्दरत्नावल्यौ । रे, २०४ ॥ मेघः । इति हेमचन्द्रः । २ । ११ ॥ वायुः । चन्द्रः । इति नानार्थरत्नमाला ॥ विक्रमादित्यभूपस्य नवरत्नान्तर्गतरत्नविशेषः । यथा,—

"धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य ॥"

इति नवरत्नम् ॥

मिहिराणः, पुं, ( मिहिरेणाप्यणयतेऽस्तूयत इति । अण् + घञ् । ) शिवः । इति त्रिकाण्डशेषः ॥

मी ञ्रो ग ञ वधे । इति कविकल्पद्रुमः ॥ (क्रा०-उभ०-सक०-सेट् । ) ञ्रो मीनः । ग ञ मीनाति मीनीते । इति दुर्गादासः ॥

मी कि गत्याम् । मत्याम् । इति कविकल्पद्रुमः ॥ ( चुरा०-पक्षे भ्वा०-सक०-अनिट् ।) कि माययति मयति । इति दुर्गादासः ॥

मी ङ य वधे । इति कविकल्पद्रुमः ॥ ( दिवा०-आत्म०-सक०-अनिट् । ) ङ य मीयते । इति दुर्गादासः ॥

मीढ़, त्रि, मूत्रितम् । इत्यमरः । ३ । १ । ६६ ॥ ह क्षरणमूत्रोत्सर्गे । मिहौ षिचि मूत्रत् क्त प्रत्यये आभ्यां धात्वर्थेनोपसंग्रहादकर्म्मकत्वात् कर्त्तरि क्तः । इति भरतः ॥

मीढ़ुष्टमः, पुं, ( मीढ़ुस् तमप्प्रत्ययेन पृषोदरादित्वात् साधुः । ) शिवः । यथा,—

"तदा सर्व्वाणि भूतानि ! श्रुत्वा मीढ़ुष्टमोदितम् ।
परितुष्टात्मभिस्तात साधु साध्वित्यथाब्रुवन् ॥"

इति श्रीमद्भागवते ४ स्कन्धे ६ अध्यायः ॥

"मीढ़ुष्टमः शिवस्तेनोक्तम् ।" इति तट्टीकायां श्रीधरस्वामी ।

मीढ्वान्, [ स् ] पुं, ( मिह सेचने । "दाश्वान् साह्वान् मीढ्वांश्च ।" ६ । १ । १२ । इति छन्दसि क्वसुः । द्वित्वाभावः अनिट्त्वं उपधादीर्घत्वं ढत्वञ्च निपात्यते ।) शिवः । यथा,—

"ततो मीढ्वांसमामन्त्र्य शुनासीराः सहर्षिभिः ।
भूयस्तद्देवयजनं समीढ्वद्वेधसो ययुः ॥"

इति श्रीमद्भागवते ४ स्कन्धे ६ अध्यायः ॥

"मीढ्वांसं शिवं मीढुषा वेधसा च वर्त्तमानाः ।" इति तट्टीकायां श्रीधरस्वामी ॥ (वर्षितरि, त्रि । यथा, ऋग्वेदे । २ । २४ । १ ।

"यथा नो मीढ्वान् स्तवते सखा तव इहस्पते ।"

"मीढ्वान् सेक्ता स्तुतेर्वर्षिता ।" इति तद्भाष्ये सायणः ॥ )

मीनः, पुं, (मीयते इति मीञ् हिंसायाम् । "फेनमीनौ ।" उणा० ३।३। इति नक् निपातितश्च ।) मत्स्यः । इत्यमरः । १ । १० । १७ ॥ ( यथा, भागवते । ३ । २ । ८ ।

"दुर्भगो बत लोकोऽयं यदवो नितरामपि ।
ये संवसन्तो न विदुर्हरिं मीन इवोडुपम् ॥")

मेषादिद्वादशराश्यन्तर्गतान्तिमराशिः । तत्पर्य्यायः । अन्त्यभम् २ । स च पूर्व्वभाद्रपदाशेषपादोत्तरभाद्रपदारेवतीसमुदायेन भवति । अस्याधिष्ठातृदेवता स्त्रीमत्स्यद्वयं स च कीटसंज्ञः । जलजः । सौम्यः । अङ्गना । युग्मः । समः । द्व्यात्मकः । भक्ष्यः । उत्तरदिङ्नाथः । गुरुक्षेत्रम् । दिनात्मकश्च । इति ज्योतिस्तत्त्वम् ॥ अपि च । शीर्षपृष्ठोदयः । चरणरहितः । कफप्रकृतिः । जलचारी । निःशब्दः । पिङ्गलवर्णः । स्निग्धः । अत्यन्तस्त्रीसङ्गः । बहुसन्तानः । ब्राह्मणवर्णः । श्यामाङ्गश्च । तत्र जातः अतिक्रोधनः । शीघ्रगतिः । अशुचिः । कर्म्मभोगी । प्रचुरविवाहश्च भवति । इति बृहज्जातकादयः ॥ अपि च ।

"मीनलग्ने समुत्पन्नो रत्नकाञ्चनपूरितः ।
अल्परोमा महाप्राज्ञो दीर्घकालपरीक्षकः ॥"

इति कोष्ठीप्रदीपः ॥ * ॥

राशौ तल्लग्ननिरूपणं यथा । सूर्पाकारताराचतुष्टयात्मकपूर्व्वाषाढ़ानक्षत्रे मस्तकोपरि दृष्टे सति मीनलग्नस्य १ । ४६ ऊनपञ्चाशत्पलाधिकैकदण्डो भवति । प्रकारान्तरे । सूर्पाकृतिताराचतुष्टयात्मकोत्तराषाढ़ानक्षत्रे मस्तकोपरि उदिते सति मीनलग्नस्य २ । ३६ षट्त्रिंशत्पलाधिकदण्डद्वयं भवति । यथा,—

"सूर्पमूर्त्तिनि शिरोगते
चतुस्तारके करिकरोरुवारिभे ।
अन्त्यभादन्तवाणि ! निर्गताः
खेचराम्बरशशाङ्कलिप्तिकाः ॥ दं १।४६।
शीर्षभाजिभचतुष्टयाकृति
विश्वभे तरुणि सूर्पकाकृतौ ।
भ्रूतिरस्कृतमनोजकार्म्मुके !
यान्ति कालतिथिलिप्तिका भवात् ॥"

दं २ । ३६ ॥

इति कालिदासकृतराशिलग्ननिरूपणम् ॥*॥

भगवद्दशावतारान्तर्गतप्रथमावतारः । यथा,

"शेते स चित्तशयने मम मीन कूर्म्म-
क्रोडोऽभवन् नृहरिवामनजामदग्न्यः ।
योऽभूद्बभूव भरताग्रजहलायुधः
कल्की सतां च भविता प्रहरिष्यतेऽरीन् ॥"

इति मुग्धबोधव्याकरणम् ॥

अस्य विवरणं मत्स्यशब्दे द्रष्टव्यम् ॥ * ॥ विशेषश्चात्र कथ्यते ।

"प्रकृतिर्विष्णुरूपा च पुंरूपश्च महेश्वरः ।
एवं प्रकृतिभेदेन भेदास्तु प्रकृतेरंश ।
कृष्णरूपा कालिका स्याद्रामरूपा च तारिणी ।
वगला कूर्म्ममूर्त्तिः स्यान्मीनो धूमावती भवेत् ॥
छिन्नमस्ता नृसिंहः स्याद्वराहश्चैव भैरवी ।
सुन्दरी जामदग्न्यः स्याद्वामनो भुवनेश्वरी ॥
कमला बौद्धरूपा स्यात् मातङ्गी कल्किरूपिणी ।
स्वयं भगवती काली कृष्णस्तु भगवान् स्वयम् ॥
स्वयञ्च भगवान् कृष्णः कालीरूपो भवेद्व्रजे ।"
दुर्गा स्यात् कल्किरूपिणीति पाठान्तरम् ।

इति मुण्डमालातन्त्रम् ॥

मीनकेतनः, पुं, ( मीनः केतने अस्य । ) कन्दर्पः । इत्यमरः । १ । १ । २६ ॥ ( यथा, दशकुमारचरिते । ५ ।

"अथ मीनकेतनसेनानायकेन ।"

मीनगोधिका, स्त्री, (मीनगोधिकानामावासोऽत्र ।) जलाशयः । यथा,—

'पल्वलं दीर्घिका वापी यष्टिका मीनगोधिका ।'

इति त्रिकाण्डशेषः ॥

मीनघाती, [ न् ] पुं, ( मीनं हन्तीति । हन + णिनिः । ) वकः । इति राजनिर्घण्टः ॥ मत्स्यघातके, त्रि ॥

मीननेत्रा, स्त्री, ( मीनस्य नेत्राकारा ग्रन्थिरस्याः ।) गण्डदूर्व्वा । इति राजनिर्घण्टः ॥

मीनरः, पुं, (मीनाः भक्ष्यत्वेन सन्त्यस्य । मीन + "वुञ् छण्कठजिलेति ।" ४ । २ । ८० । इति अश्मादित्वात् रः ।) हारकः । इति त्रिकाण्डशेषः ॥ हाङ्गर इति भाषा ॥

मीनरङ्कः, पुं, ( मीनरङ्क । पृषोदरादित्वात् साधुः । ) मत्स्याशनपक्षी । इति त्रिकाण्डशेषः । माछराङ्गा इति भाषा ॥ क्वचित् पुस्तके मत्स्यरङ्क इत्यपि पाठः ॥

मीना, स्त्री, उषाकन्या । सा तु कश्यपभार्य्या । यथा, वह्निपुराणे ।

"उषायास्तु प्रवक्ष्यामि सर्गं पञ्च सुतास्ततः ।
मीना मेना तथा वृत्ता अनुवृत्ता तथैव च ॥
परिवृत्ता च विज्ञेया तासाञ्च शृणुत प्रजाः ।'

मीनाक्षी, स्त्री, शर्करा । इति राजनिर्घण्टः । ( विशेषोऽस्याः शर्कराशब्दे विधेयः ॥ )

मीनाण्डीवः, पुं, दर्दुराम्रः । खञ्जनः । इति मेदिनी । णे, १०५ ॥

मीनालयः, पुं, (मीनानामालयः ।) समुद्रः । इति धनञ्जयः ॥

मीनाक्षी, स्त्री, ( मीनस्याक्षिणी इव अक्षिणी अस्याः ।) मत्स्याक्षी । गण्डदूर्व्वा । इति राजनिर्घण्टः ॥ कुवेरकन्या । इति पुराणम् ॥

मीम ऋ शब्दे गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-शब्दे अक०-गतौ सकं पर०-सेट् । ) ऋ अमिमीमत् । इति दुर्गादासः ॥

मीमांसकः, पुं, ( मीमांसामधीते वेद वेत्ति । मीमांसा + "क्रमादिभ्यो वुन् ।" ४ । २ । ६१ । इति वुन् ।) मीमांसाशास्त्रवेत्ता । तत्पर्य्यायः । सिद्धान्ती २ । इति जटाधरः ॥ मीमांसाशास्त्राध्येता च । ( विषयोऽस्य यथा,—